**PAPER - 2**

# MT

**2018 .... .... 1200** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - II**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

---

**प्रथमः विभागः - गद्यम् ।**

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत यतः .......... ।

(उपचारार्थं धनव्ययः नाभवत् । / स्वास्थ्यरक्षणस्य रहस्यं तेन ज्ञातम् ।)

II) कः कं वदति ? १

भवतः उपचाराः प्रारब्धाः एव ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कार्यव्यग्रजनाः आरोग्यं प्रति अनुत्साहिताः ।

सुहास्यवदनः अनन्तभट्टोऽवदत्, ''भवत उपचाराः प्रारब्धा एव । मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् ।'' एतन्निशम्य चकितचकितः सोमशर्मा अपृच्छत्,''षड् वैद्याः ?'' अनन्तभट्टः प्रत्युवाच - ''सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामश्चेति । एतेभ्यो महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते । भवत्सदृशा विविधकार्यव्यग्रा जना एतेषु षट्सु वैद्येषु नावधानं ददतीति जानाम्यहम् । अत एव भवान् प्रभाते पद्भ्यामागच्छतु इति मया कथितम् । भवन्तमहं शीतलजले स्नातुं सात्त्विकभोजनं भोक्तुं च प्रेरितवान् । एते सर्वेऽनुभवाः आनन्ददायका इति भवता सूचितमेव। भवानेतान् षड्वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु । एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्? इतोऽपि यदि भवानधिकं साहाय्यमपेक्षते तर्हि सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति''। बद्धाञ्जलिः सोमशर्मा सादरमनन्तभट्टाय अकथयत्, ''सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये।'' ततो वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । १

१) सिद्धोऽस्मि = ........ + ........।

(सिद्धाः + अस्मि / सिद्धः + अस्मि / सिद्धः + आस्मि)

२) जानाम्यहम्= ........ + ........।

(जानाम्य + हम् / जानामि+ यहम् / जानामि + अहम् )

II) समूहेतरपदं लिखत। १
१) विश्रान्तिः, अनायासः, उपचाराः, विश्रामः
२) सानन्दम्, सहर्षम्, सततम्, सोल्लासम्

III) योग्ये विशेषणे चित्वा लिखत । १
१) ....... अनुभवाः ।
२) ........ उपचाराः ।

IV) गद्यांशे आगते २ पूर्वकालवाचक - धातुसाधित - ल्यबन्त - अव्यये ....... , ......। १

**३. स्वमतप्रकटनम् ।**

'आरोग्यम् एव सम्पद्' इति विषये मतप्रकटनं कुरुत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

माहात्म्यनिश्चितिसमये लेरसिया .......... वा .......... न गणयति स्म ।

(धनवत्तां / सहृदयतां) (क्षमाशीलतां / दारिद्र्यं)

II) पूर्णवाक्येन उत्तरत । १

ग्रामं प्रविश्य लेरसिया सहकारिणश्च कुत्र स्थिताः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कः लेरसिया इति सर्वे ग्रामवासिनः जानन्ति स्म ।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा। अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म । धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म ।कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कञ्चन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्याश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत । तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः । तत्र ते सर्वे मार्गे समुपाविशन् । तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १
१) वागणयित्वा = वा + ........... ।
२) कस्याश्चिदोषधेः = .......... + औषधेः ।

II) चतुर्थपदं लिखत । १

१) अभद्रम् : रूपहीनम् :: पथि : ....... ।

२) धनवत्ता : दारिद्र्यम् :: दुष्टता : ........।

III) गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।** २

**यथाक्रमं घटनाः लिखत ।**

i) मृत्तिकायाः लेपः । ii) कशाघातैः व्रणनम् ।

iii) दीनतरं / जुगुप्साकरं दर्शनम् । iv) अङ्गरसस्य विलेपनम् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) अन्तर्जालम् अस्मभ्यं सर्वविधं .......... वितरति । (मनोरञ्जनं / संज्ञापनं)

२) अन्तर्जालम् .......... कल्पवृक्षः इति मन्यते । (प्राचीनकाले / अर्वाचीनकाले)

II) पूर्णवाक्येन उत्तरं लिखत । १

'सॉफ्टवेअर' कार्यक्रमस्य साहाय्येन किं भवति ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

आर्थिकमन्दायने सङ्गणकीयवाणिज्यं शापः एव ।

सङ्गणकानां लघुगुरुजालकानां मिथः सम्बन्धेन विश्वव्यापि यज्जालं भवति, तदेव सङ्गणकजालान्तरिक्षं खलु । अन्तर्जालमिति ज्ञानप्राप्तेरतिद्रुतगतिमार्ग एव । अन्तर्जालं नाम विश्वव्यापिजालं संज्ञापनतन्त्रज्ञानस्य महाजालं वा । जनानां जनहितार्थं जनैर्निर्मितमिदं गणतन्त्रमेव । अहो बत, नापेक्षतेऽ स्यापरिमितज्ञानार्जनस्य कृते नाणकमेकमपि । यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति । सांख्यिकीयं ज्ञानं तथा सङ्गणकयन्त्रस्य 'सॉफ्टवेअर' इति कार्यक्रमोऽपि अन्तर्जाले उपलब्धो भवति । तस्य साहाय्येन विविधविषयकाणि नानाकार्याणि विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन कर्तुं शक्नुवन्ति सर्वे जनाः । अधुना आर्थिकमन्दायने तु सङ्गणकीयवाणिज्यं वरदानमेवेति सिद्धम् । आयुर्विमा-विद्युद्-दूरदर्शन-दूरध्वनि-सेवाशुल्कानि तथा विविधव्यवहारार्थं धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमो वयम् । एतदर्थं सद्यस्क-कुसीदवृत्तिः अवलम्ब्यते। जनाः सङ्गणकीयपत्रेण सत्वरं स्वसन्देशं प्रेषयन्ति तथा सद्यस्क-आलापमपि कुर्वन्ति । एवं ज्ञानवृद्धिकरः वरः खलु एषः । अस्यान्तर्जालस्योपयोगः केवलं मानवहितायैव भवतु ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत - (उचितं पर्यायं चिनुत ।) १

१) कल्पवृक्षस्तथा = ............. । (कल्पवृक्षः + स्तथा) (कल्पवृक्षः + तथा)

२) मानवहितायैव = ............. । (मानवहिताय + एव) (मानवहिताय + ऐव)

II) गद्यांशात् चित्वा पर्यायपदं लिखत । १

१) त्वरया - .......... । २) वार्तालापः - .......... ।

III) मेलनं कुरुत । १

| | |
|---|---|
| १) ग्रन्थाः | ज्ञानम् |
| २) सामान्यम् | संज्ञापनम् |
| | सहस्रशः |
| | जनाः |

IV) **शब्दज्ञानम् ।** १

| सङ्गणकीयपरिभाषा । | संस्कृतप्रतिशब्दाः । |
|---|---|
| (i) online banking | .................... |
| (ii) e-mail | .................... |

३. **पृथक्करणम् ।** २

सेवाशुल्कार्थं सङ्गणकद्वारा धनस्य हस्तान्तरणम् एतदर्थं कर्तुं शक्यते ।

**द्वितीयः विभागः - पद्यम् ।**

प्र.२. अ) **पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् । (स्तम्भपूरणं कुरुत ।)** २

उचितान् शब्दान् चित्वा कोष्ठकं पूरयत ।
(हितवान् परः, अहितः बन्धुः,
आरण्यम् औषधम्, देहजः व्याधिः)

| बन्धुवत् | अबन्धुवत् |
|---|---|
| | |

परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ।।१।।
त्यागसुरक्तः कृषिभिर्हरितः
वैज्ञानिकयशसा च श्वेतः ।
त्रयोऽपि वर्णाः प्रदत्ताश्च यैर्ध्वजाय चास्माकम्
जयतु जवानो, जयतु किसानो, जयतु च विज्ञानम् ।
नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम्
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ।।२।।

२. **स्पष्टीकरणम् ।** २

श्वेतवर्णः किं सूचयति इति द्वितीयश्लोकस्य आधारेण स्पष्टीकुरुत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) समूहेतरं पदं चित्वा लिखत । १

१) क्षितीशः, भूपः, क्षितिपालः, सुरेशः । २) सुता, पुत्रः, तनयः, सूनुः ।

II) गजनीनरेशस्य कृते उपयोजिते द्वे विशेषणे लिखत । १

वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ।।१।।
तस्मादभूत् केसरखानवीरः पुनस्तदीयो हसनक्षितीशः ।
तस्मादभूदेदलशाहभूपः पुत्रोऽभवत् तस्य मुबारखेन्द्रः ।।२।।
इत्युक्तः स तपोदत्तः शक्रेण द्विजरूपिणा ।
विचार्य विद्यां तत् प्राप्तुं तपस्त्यक्त्वा गृहं ययौ ।।३।।

२. **अन्वयपूर्तिः ।** २

....... शक्रेण इति ....... सः तपोदत्तः ....... तपः त्यक्त्वा ....... प्राप्तुं गृहं ययौ ।

**क) अधोदत्तेषु सुभाषितेषु २ सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) यस्य ......... बृहस्पतिः ।।

ii) यो यमर्थं ......... निवर्तते ।।

iii) मित्रं ......... विपत् ।।

**ड) वृत्तनाम चिनुत ।** १

अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।

अस्य श्लोकस्य वृत्तनाम ...... इति । (गीतिः, इन्द्रवज्रा, उपेन्द्रवज्रा)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) एकपदेन उत्तरं लिखत । १

भीमरायः कामं किम् अजानात् ?

II) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

संस्कृतभाषा राष्ट्रभाषा भवितुमर्हति इति भीमरायस्य अभिमतम् ।

प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ।।१।।
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ।।२।।
संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ।।३।।
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ।।४।।
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ।।५।।

२. **पृथक्करणम् ।** २




## चतुर्थः विभागः - लेखनकौशल्यम्

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः । (मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।)** ५

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र निर्मितेषु ...... पक्षिणः वर्षास्वपि सुखेन निवसन्ति । अथैकदा धारासारैर्महती वृष्टिः बभूव । तदा तरुतले अवस्थितान् शीतार्तान् कम्पमानान् वानरानवलोक्य पक्षिभिरुक्तम् अस्माभिश्चञ्चुभिस्तृणानि ...... नीडाः निर्मिताः । यूयं हस्तपादादिसंयुताः अपि किमवसीदथ। तच्छ्रुत्वा वानराः ...... । तैरालोचितम् एते नीडास्थिताः सुखिनः पक्षिणः अस्मान् निन्दन्ति । तद् भवतु वृष्टेः उपशमः। ...... पानीयवर्षे तैर्वानरैः वृक्षमारुह्य सर्वे नीडाः भग्नाः पक्षिणामण्डानि च अधः पातितानि। अत उच्यते उपदेशो हि मूर्खाणां ...... न शान्तये ।

( आहृत्य, शान्ते, नीडेषु, प्रकोपाय, क्रुद्धाः)

**ब) निबन्धलेखनम् ।**

**३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) वृत्तपत्राणि ।　　ii) प्रियः कविः ।　　iii) गणतन्त्रदिवसः ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) Tell your mobile number.

ii) Tigers do not eat grass and the tree leaves.

iii) If I will go to Kashi, I will bring many books of Sanskrit.
iv) Let your fame ever increase.
v) Have you read that news?
vi) Proper diet is essential for growth of the body.
vii) Peacock-feather looks beautiful on the head of Lord Krishna.
viii) I go to library.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) स्निह् (४ प.प.) २) प्र + विश् (६ प.प.)
३) रुच् (१ आ.प.) ४) रक्ष् (१ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) कूपं समीपे आम्रवृक्षः अस्ति । २) धिक् अर्थेन ।
३) वाचनाय ऋते ज्ञानम् अशक्यम् । ४) अलं साहसात् ।

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३
**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| क्षिप् (६ प.प.) | क्षेप्स्यति | ....... | ....... | क्षिपति | ...... | ...... |
| ब्रू (२ प.प) | ...... | उवाच | ....... | ....... | ब्रवीतु | ...... |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी | .......... | धनवतोः | .......... |
| तृतीया | वाचा | .......... | .......... |
| पञ्चमी | मत् | ........ | .......... |
| द्वितीया | .......... | भवन्तौ | ......... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(प्राप्ता, आनीतवान्, गन्तव्यः, कृत्यः, भाषमाणः, लिखन्ती, दत्तम्, पीतवती)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विग्रहः | समासनाम |
|---|---|
| i) श्रवणं च मननं च । | कर्मधारय |
| ii) उल्लासेन सह । | नञ् तत्पुरुष |
| iii) विचाराणां सरणिः । | बहुव्रीहि |
| iv) चिन्तने मग्नः । | प्रादि तत्पुरुष |
| v) न प्रियम् । | इतरेतर द्वन्द्व |
| vi) अम्बरम् एव अङ्गणम् । | सप्तमी तत्पुरुष |
| vii) विशेषेण ख्यातः । | अव्ययीभाव |
| viii) नीलः कण्ठः यस्य सः । | षष्ठी तत्पुरुष |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) मया चीवरम् उपयोजितम् । (प्रयोगपरिवर्तनं कुरुत ।)

ii) नष्टे कारणे कुतः कार्योत्पत्तिः । (यदि-तर्हि उपयुज्य वाक्यं पुनर्लिखत ।)

iii) राष्ट्रध्वजः मां कीर्तिकथाः स्मारयति । (प्रयोजकं निष्कासयत ।)

iv) भवान् पद्भ्यामागच्छतु । (भवान् इत्यस्य स्थाने त्वम् उपयुज्य वाक्यं पुनर्लिखत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) नवरात्रं नाम ............रात्रीणां समाहारः । (9)

ii) पाण्डवेषु अर्जुनः............। ($3^{rd}$)

iii) ..........पुराणानि प्रसिद्धानि । (18)

iv) पितामही दिनस्य ..........भोजनं करोति । (once)

 

**षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

प्रतियोगिताप्रधानमिदं युगम् । जीवने विकासाय प्रतियोगितानां महती उपादेयता वर्तते । मानवः प्रतिस्पर्धया एव उन्नतिपथमारोहति । प्रायशः ये गुणाः बालकेषु सुप्तरूपेण विद्यन्ते, तेषां विकासाय प्रतियोगिताः अनिवार्याः एव । यदा बालाः छात्रजीवने अनेकासु प्रतियोगितासु सहभागिनः भवन्ति, यथा भाषण-निबन्धलेखन-चित्ररचना-वाद-विवादक्रीडादीनां प्रतियोगिताः, तदा एताभिः तेषां क्षमतानां विकासःभवति । अतः जीवने सर्वाङ्गीणविकासाय प्रतियोगितासु सहभागः ग्रहीतव्यः ।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

उद्धतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
ते वै यथोक्तवक्तारो न वध्याः पृथिवीभुजा ।।१।।
कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ।।२।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

मन्त्री – महाराज ! दुग्धपूर्णं पात्रं दत्त्वा मया सूचितं यत् अस्माकं राजसभा पण्डितैः पूर्णा ।
तत्र अन्यस्य अर्थे स्थानं नास्तीति ।
राजा – अथ ब्राह्मणस्य उत्तरं किमासीत्?
मन्त्री – तेन उत्तरितम् - यथा दुग्धे शर्करा विलीना भवति तस्य माधुर्यं च वर्धयते ।
तथैवाहं पण्डितेषु निलीय स्थास्यामि, सभायाः माधुर्यं च वर्धयिष्यामि ।
राजा – अहो ! अद्भुतं तस्योत्तरम् ।

**Best of Luck**